# .. argalAstotram ..

# ॥ અર્ગલાસ્તોત્રમ્ ॥

## Document Information

Text title : argalAstotra from Durga Spatashati or Devi Mahat-
mya

File name : argalaastotra.itx

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Smt. K. Shankaran (kapilasankaran at yahoo.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description-comments : Verses for devi durga

Latest update : April 21, 1998, July 13, 2008

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ અર્ગલાસ્તોત્રમ્ ॥

॥ શ્રી॥

શ્રીચણ્ડિકાધ્યાનમ્

ૐ બન્ધૂકકુસુમાભાસાં પઞ્ચમુણ્ડાધિવાસિનીમ્ ।
સ્ફુરચ્ચન્દ્રકલારત્નમુકુટાં મુણ્ડમાલિનીમ્ ॥

ત્રિનેત્રાં રક્તવસનાં પીનોન્નતઘટસ્તનીમ્ ।
પુસ્તકં ચાક્ષમાલાં ચ વરં ચાભયકં ક્રમાત્ ॥

દધતીં સંસ્મરેન્નિત્યમુત્તરામ્નાયમાનિતામ્ ।
અથવા
યા ચણ્ડી મધુકૈટભાદિદૈત્યદલની યા માહિષોન્મૂલિની
યા ધૂમ્રેક્ષણચણ્ડમુણ્ડમથની યા રક્તબીજાશની ।
શક્તિઃ શુમ્ભનિશુમ્ભદૈત્યદલની યા સિદ્ધિદાત્રી પરા
સા દેવી નવકોટિમૂર્તિસહિતા માં પાતુ વિશ્વેશ્વરી ॥

અથ અર્ગલાસ્તોત્રમ્

ૐ અસ્ય શ્રીઅર્ગલાસ્તોત્રમન્ત્રસ્ય વિષ્ણુરૃષિઃ, અનુષ્ટુપ્ છન્દઃ, શ્રીમહાલક્ષ્મીર્દેવતા, શ્રીજગદમ્બાપ્રીતયે સપ્તશતિપાઠાઙ્ગત્વેન જપે વિનિયોગઃ ।

ૐ નમશ્ચણ્ડિકાયૈ

માર્કણ્ડેય ઉવાચ ।
ૐ જય ત્વં દેવિ ચામુણ્ડે જય ભૂતાપહારિણિ ।
જય સર્વગતે દેવિ કાલરાત્રિ નમોઽસ્તુ તે ॥ ૧॥

જયન્તી મઙ્ગલા કાલી ભદ્રકાલી કપાલિની ।
દુર્ગા શિવા ક્ષમા ધાત્રી સ્વાહા સ્વધા નમોઽસ્તુ તે ॥ ૨॥

મધુકૈટભવિધ્વંસિ વિધાતૃવરદે નમઃ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૩॥

મહિષાસુરનિર્નાશિ ભક્તાનાં સુખદે નમઃ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૪॥

ધૂમ્રનેત્રવધે દેવિ ધર્મકામાર્થદાયિનિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૫॥

રક્તબીજવધે દેવિ ચણ્ડમુણ્ડવિનાશિનિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૬॥

નિશુમ્ભશુમ્ભનિર્નાશિ ત્રિલોક્યશુભદે નમઃ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૭॥

વન્દિતાઙ્ઘ્રિયુગે દેવિ સર્વસૌભાગ્યદાયિનિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૮॥

અચિન્ત્યરૂપચરિતે સર્વશત્રુવિનાશિનિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૯॥

નતેભ્યઃ સર્વદા ભક્ત્યા ચાપર્ણે દુરિતાપહે ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૦॥

સ્તુવદ્ભ્યો ભક્તિપૂર્વં ત્વાં ચણ્ડિકે વ્યાધિનાશિનિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૧॥

ચણ્ડિકે સતતં યુદ્ધે જયન્તિ પાપનાશિનિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૨॥

દેહિ સૌભાગ્યમારોગ્યં દેહિ દેવિ પરં સુખમ્ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૩॥

વિધેહિ દેવિ કલ્યાણં વિધેહિ વિપુલાં શ્રિયમ્ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૪॥

વિધેહિ દ્વિષતાં નાશં વિધેહિ બલમુચ્ચકૈઃ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૫॥

સુરાસુરશિરોરત્નનિઘૃષ્ટચરણેઽમ્બિકે ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૬॥

વિદ્યાવન્તં યશસ્વન્તં લક્ષ્મીવન્તઞ્ચ માં કુરુ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૭॥

દેવિ પ્રચણ્ડદોર્દણ્ડદૈત્યદર્પનિષૂદિનિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૮॥

પ્રચણ્ડદૈત્યદર્પઘ્ને ચણ્ડિકે પ્રણતાય મે ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૧૯॥

ચતુર્ભુજે ચતુર્વક્ત્રસંસુતે પરમેશ્વરિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૨૦॥

કૃષ્ણેન સંસ્તુતે દેવિ શશ્વદ્ભક્ત્યા સદામ્બિકે ।

રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૨૧॥

હિમાચલસુતાનાથસંસ્તુતે પરમેશ્વરિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૨૨॥

ઇન્દ્રાણીપતિસદ્ભાવપૂજિતે પરમેશ્વરિ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૨૩॥

દેવિ ભક્તજનોદ્દામદત્તાનન્દોદયેઽમ્બિકે ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૨૪॥

ભાર્યાં મનોરમાં દેહિ મનોવૃત્તાનુસારિણીમ્ ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૨૫॥

તારિણિ દુર્ગસંસારસાગરસ્યાચલોદ્ભવે ।
રૂપં દેહિ જયં દેહિ યશો દેહિ દ્વિષો જહિ ॥ ૨૬॥

ઇદં સ્તોત્રં પઠિત્વા તુ મહાસ્તોત્રં પઠેન્નરઃ ।
સપ્તશતીં સમારાધ્ય વરમાપ્નોતિ દુર્લભમ્ ॥ ૨૭॥

॥ ઇતિ શ્રીમાર્કણ્ડેયપુરાણે અર્ગલાસ્તોત્રં સમાપ્તમ્ ॥

---

Encoded by K. Shankaran (kapilasankaran at yahoo.com)
Proofread by Sunder Hattangadi sunderh at hotmail.com

.. argalAstotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*